ष्टौना(?)॥स्वेद इत्येष सुखप्रोक्तो महर्षिणा ॥१३॥
इति त्रयोदशविधः स्वेदोऽग्निगुणसंश्रयः ॥*॥
व्यायाम उष्णसदनं गुरुप्रावरणं क्षुधा ।
बहुपानं भयक्रोधावुपनाहाहवातपाः ।
स्वेदयन्ति दशैतानि नरमग्निगुणादृते ॥
इत्युक्तो द्विविधः स्वेदः संयुक्तोऽग्निगुणैर्न च ।
एकाङ्गसर्व्वाङ्गगतः स्निग्धो रूक्षस्तथैव च ॥
इत्येतत् द्विविधं द्वन्द्वं स्वेदमुद्दिश्य कीर्त्तितम् ।
स्निग्धस्वेदैरुपक्रम्य स्विन्नः पथ्याशनो भवेत् ।
तदहः स्विन्नमात्रस्तु व्यायामं वर्जयेन्नरः ॥”
इति ॥ * ॥
तत्र श्लोकाः ।
“स्वेदो यथा कार्य्यकरो हितो येभ्यश्च यद्विधः ।
यत्र देशे यथायोग्यो देशो रक्ष्यश्च यो यथा ॥
स्विन्नातिस्विन्नरूपाणि तथातिस्विन्नभेषजम् ।
अस्वेद्याः स्वेदयोग्याश्च स्वेदद्रव्याणि कल्पना ॥
त्रयोदशविधः स्वेदो विना दशविधोऽग्निना ।
संग्रहेण च षट् स्वेदाः स्वेदाध्याये निदर्शिताः ॥
स्वेदाधिकारे तद्वाच्यमुक्तमेतन्महर्षिणा ।
शिष्यैस्तु प्रतिपत्तव्यमुपदेष्टा पुनर्व्वसुः ॥”
इति चरकीयस्वेदाध्यायः समाप्तः ॥ * ॥
अथ स्वेदविधिः ।
“स्वेदश्चतुर्व्विधः प्रोक्तस्तापोष्णस्वेदसंज्ञितः ।
उपनाहो द्रवस्वेदः सर्व्वे वातार्त्तिहारिणः ॥”
तापस्वेदः उष्णस्वेदश्च ताभ्यां संज्ञितः । उपनाहः उपनाहस्वेदः ।
“स्वेदौ तापोष्णजौ प्रायः श्लेष्मघ्नौ समुदीरितौ ।
उपनाहस्तु वातघ्नः पित्तरोगे द्रवो हितः ॥”
द्रवो द्रवस्वेदः ।
“महाबले महाव्याधौ शीते स्वेदो महान् स्मृतः ।
दुर्ब्बले दुर्ब्बलस्वेदो मध्यमे मध्यमो मतः ॥
बलासे रूक्षणः स्वेदो रूक्षः स्निग्धः कफानिले ॥
रूक्षणः रूक्षयतीति. रूक्षणः नन्द्यादित्वात् ल्युप्रत्ययः ।
“कफमेदोवृते वाते कोष्णगेहं रवेः करात् ।
नियुद्धं मार्गगमनं गुरुप्रावरणं क्षुधम् ॥
चिन्ताव्यायामभारांश्च सेवेतामयमुक्तये ।
येषां नस्यं प्रदातव्यं वस्तिश्चापि हि देहिनाम् ।
शोधनीयाश्च ये केचित् पूर्व्वस्वेद्याश्च ते मताः ।
स्वेद्याः ऊर्द्ध्वं त्रयोऽप्येते भगन्दर्य्यर्शसस्तथा ।
अश्मर्य्या चातुरो जन्तुः शमयेच्छस्त्रकर्म्मणः ॥”
शस्त्रकर्म्मण ऊर्द्ध्वं पश्चाच्चेति सुश्रुते ।
“पश्चात् स्वेद्या हृते शल्ये मूढगर्भगदे तथा ।
काले प्रजातेऽकाले वा पश्चात् स्वेद्या नितम्बिनी ।
सर्व्वान् स्वेदान्निवाते च जीर्णेऽन्ने वा विचारयेत् ॥
स्वेदाद्धातुस्थिता दोषा स्नेहक्लिन्नस्य देहिनः ।
द्रवत्वं प्राप्य कोष्ठान्तर्गत्वा यान्ति विरेकिताम् ॥
स्नेहाभ्यक्तशरीरस्य शीतैराच्छाद्य चक्षुषी ।
स्विद्यमानस्य च मुहुर्हृदयं शीतलैः स्पृशेत् ॥
शीतैरार्द्रवस्त्रादिभिः ॥
“अजीर्णी दुर्ब्बलो मेही क्षतक्षीणः पिपासितः ।
अतीसारी रक्तपित्ती पाण्डुरोगी तथोदरी ।
मेदस्वी गर्भिणी चैव न हि स्वेद्या विजानता ॥
स्वेदादेषां यान्ति देहा विनाशं
नो साध्यत्वं यान्ति चैषां विकाराः ॥
एतानपि मृदुस्वेदैः स्वेदसाध्यानुपाचरेत् ।
मृदुस्वेदं प्रयुञ्जीत तथा हृन्मुष्कदृष्टिषु ॥
अतिस्वेदात् सन्धिपीड़ा दाहस्तृष्णा क्लमो भ्रमः ।
पित्तासृक्पिड़काकोपस्तत्र शीतैरुपाचरेत् ॥”
तत्र तापस्वेदमाह ।
“तेषु तापाभिधः स्वेदो वालुकावस्त्रपाणिभिः ।
प्रतप्तैरम्लसिक्तैश्च कार्य्योऽलक्तकवेष्टिते ॥”*॥
उष्मस्वेदमाह ।
“अथवा वातनिर्णाशद्रव्यक्वाथरसादिभिः ।
उष्णैर्घटं पूरयित्वा पार्श्वे च्छिद्रं विधाय च ॥
विमुद्रास्यं विम्बखण्डञ्च धातजां काष्ठजामुत ।
षड़ङ्गुलास्यां गोपुच्छां नाड़ीं युञ्ज्यात् द्विहस्तिकाम् ॥
सुखोपविष्टं स्वभ्यक्तं गुरुप्रावरणावृतम् ।
हस्तिशुण्डिकया नाड्या स्वेदयेद्वातरोगिणम् ॥”
विम्बखण्डमिति स्वेदसौकर्य्यार्थम् । षड़ङ्गुलास्यामिति मूले षड़ङ्गुलविशालमुखाम् । गोपुच्छमिव क्रमकृशां तेनाग्रे गोपुच्छाग्रपरिमाणेन कृशां नाड़ीं अतः सरन्ध्राम् । द्विहस्तिकां हस्तद्वयपरिमाणाम् । हस्तिशुण्डिकयेति हस्तिशुण्डवत् क्रमकृशत्वात् नाड्या इयं संज्ञा ।
“पुरुषायाममात्रान्तु भूमिं संमार्ज्य खादिरैः ।
काष्ठैर्दग्ध्वा तथाभ्युक्ष्य क्षीरधान्याम्लवारिभिः ॥
वातघ्नपत्रैराच्छाद्य शयानं स्वेदयेन्नरम् ।
एवं माषादिभिः स्विन्नैः शयानः स्वेदमाचरेत् ॥”
उपनाहस्वेदः ।
“तथोपनाहस्वेदञ्च कुर्य्याद्वातहरौषधैः ।
प्रदिह्य देहं वातार्त्तं क्षीरमांसरसादिभिः ॥
अम्लपिष्टैः सलवणैः सुखोष्णैः स्नेहसंयुतैः ।
ततो ग्राम्यानूपमांसैर्जीवनीयगणेन च ॥
दधिसौवीरकक्षीरैर्वीरतर्व्वादिना तथा ।
कुलत्थमाषगोधूमैरतसीतिलसर्षपैः ॥
शतपुष्पादेवदारुशेफालीस्थूलजीरकैः ।
एरण्डमूलबीजैश्च रास्नामूलकशिग्रुभिः ॥
मिसिकृष्णाकुठेरैश्च लवणैरम्लसंयुतैः ।
प्रसारण्यश्वगन्धाभ्यां बलाभिर्दशमूलकैः ॥
गुडूच्या वानरीबीजैर्यथालाभं समाहृतैः ।
क्षुण्णैः स्विन्नैश्च वस्त्रेण बद्धैः संस्वेदयेन्नरम् ॥
महाशाल्वणसंज्ञोऽयं योगः सर्व्वानिलार्त्तिहृत् ॥”
अस्यायमर्थः । उपनाहस्वेदञ्च कुर्य्यात् । केन प्रकारेण इत्याकाङ्क्षायां तत्प्रकारमाह वातहरौषधैः । कथंभूतैः । अम्लपिष्टैः अम्लेन काञ्जिकतक्रादिना पिष्टैः सलवणैः स्नेहयुतैः क्षीरमांसरसान्वितैः । सुखोष्णैः । वातार्त्तदेहं प्रदिह्य प्रलिप्य स्वेदयेदित्यर्थः । अथवा अम्लेन संपिष्टैः कोष्णैः सूक्ष्मपटस्थितैः । भेषजैः स्वेदयेत् । किंवा स्विन्नैः कोष्णैः पटस्थितैः ॥ * ॥ द्रवस्वेदमाह ।
“द्रवस्वेदस्तु वातघ्नद्रव्यक्वाथेन पूरिते ।
कटाहे कोष्ठके वापि सूपविष्टोऽवगाहयेत् ॥
सौवर्णं राजतं वापि ताम्रं लौहञ्च दारुजम् ।
कोष्ठकं तत्र कुर्व्वीतोच्छ्राये षड्विंशदङ्गुलम् ।
आयामे तावदेव स्याच्चतुष्कोणस्तु चिक्कणम् ॥”
पक्षान्तरमाह ।
“नाभेः षड़ङ्गुलं यावन्मग्नः क्वाथस्य धारया ।
कोष्णया स्कन्धयोः सिक्तस्तिष्ठेत् स्निग्धतनुर्नरः ॥”
अयमर्थः । प्रथमतो वातघ्नद्रव्यक्वाथेन कटाहे पूरिते कोष्ठके कटाहे वा सूपविष्टस्तिष्ठेत् अथवा नाभेः षड़ङ्गुलमूर्द्ध्वं यावत् क्वाथे मग्न उपविष्टः । पश्चात् क्वाथस्य धारया स्कन्धयोः सिच्यमानस्तिष्ठेत् । तथा च कोष्ठकं परिपूर्णं भवतीत्यर्थः । क्वाथपक्षे प्रथमतः स्नेहाभ्यक्ततनुरुपविशेत् ।
“मुहूर्त्तैकं समारभ्य यावत् स्यात्तच्चतुष्टयम् ।
तावत्तदवगाहेत यावदारोग्यनिश्चयम् ॥
एवं तैलेन दुग्धेन सर्पिषा स्वेदयेन्नरम् ।
एकान्तरो द्व्यन्तरो वा युक्तः स्नेहोऽवगाहने ॥
एतावता क्वाथो दुग्धञ्च नित्यमेव युज्यते ॥”
स्नेहस्तु दिनमेकं द्वे वा दिने गमयित्वा युक्तः । अग्निमान्द्यशङ्कयेति भावः ।
“सिरामुखैर्लोमकूपैर्धमनीभिश्च तर्पयन् ।
शरीरे बलमाधत्ते युक्तः स्नेहोऽवगाहने ॥
जलसिक्तस्य वर्द्धन्ते यथा मूलेऽङ्कुरादयः ।
तथैव धातुवृद्धिर्हि स्नेहसिक्तस्य जायते ॥
नातः परतरः कश्चिदुपायो वातनाशनः ।
शीतशूलव्युपरमे स्तम्भगौरवनिग्रहे ।
दीप्तेऽग्नौ मार्दवे जाते स्वेदनाद्विरतिर्मता ॥”
इति भावप्रकाशः ॥

स्वेदचूषकः, पुं, (स्वेदं चूषति पिबतीति । चूष + ण्वुल् ।) शीतलवायुः । इति केचित् ॥

स्वेदजः, त्रि, (स्वेदात् जायते इति । जन + डः ।) स्वेदाज्जातजन्तुः । कृमिदंशादिः । इत्यमरः । ३ । १ । ५१ ॥ तद्‌गणा यथा,—
“संस्वेदजविकाराश्च यथा येभ्यो भवन्ति च ।
मानुषस्वेदमलजा मक्षिकाद्या भवन्ति च ॥
नवमेघप्रसिक्तायां पिपीलिकगणादयः ।
संस्वेदजापि विज्ञेया वृक्षगोपशुजन्तवः ॥
समिद्भ्यो माषमुद्गेभ्यः फलेभ्यश्चैव जन्तवः ।
जायन्ते क्रिमयो विप्राः काष्ठेभ्यो घुणकादयः ॥
तथा शुक्रविकारेभ्यः पूतिका प्रभवन्ति च ।
संस्वेदजाश्च जायन्ते वृश्चिकाः शुष्कगोमयात् ॥
गोभ्यो हि महिषेभ्यश्च मानुषेभ्यश्च जन्तवः ।
मत्स्यादिभ्यश्च विविधा अन्तःकुक्षौ विशेषतः ॥
अथान्यानि च सूक्ष्माणि सूक्ष्मयूकास्तथैव च ।
गोभ्यश्चाऽश्वेभ्यस्तथा चैव अष्टापदा कनीनकाः ॥
मक्षिकाणां विकाराश्च उत्सृष्टोदककर्दमैः ।